# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम्-५ | गुणाः - ७० |
| विषयः - फलितज्योतिषम् | (C.C.- 2.3.5. New ) | समयः ८:०० तः ११:०० |
| दिनाङ्कः - १४/१०/२०१९ | सन्दर्भग्रन्थः - भारतीयकुण्डलीविज्ञानम् | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां कुरुत । १०**

(अ) ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते ।
नूनं लग्नबलाश्रितः पुनरयं तत्स्पष्टखेटाश्रयम् ॥

(ब) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।
लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद्ग्रहः ॥

(क) लंकोदया विघटिका गजभानि गोङ्कदस्राास्त्रिपक्षदहनाः क्रमगोत्क्रमस्थाः ।
हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थैर्मेषादितो घटतउत्क्रमतस्त्विमे स्युः ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) चरखण्डानयनम् ।

(ब) अयनांशानयनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं ससन्दर्भं व्याख्यां कुरुत । १०**

(अ) गृहं होरा च द्रेष्काणो नवांशो द्वादशांशकः ।
त्रिंशांशश्चेति षड्वर्गास्ते सौम्यग्रहजाः शुभाः ॥

(ब) कृष्णपक्षे दिवाजातः शुक्लपक्षे यदा निशि ।
विंशोत्तरी दशा प्रोक्ताऽन्यत्राप्यष्टोत्तरीस्मृता ॥

(क) दशा दशा हताकार्या दशभिर्भागमाहरेत् ।
यल्लब्धं सो भवेन्मासास्त्रिंशन्निघ्नं दिनं भवेत् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) अन्तर्दशासाधनं सोदाहरणं विलिख्यताम् ।

(ब) नवमांशविचारः कथं क्रियते ?

## तृतीयान्विति:

**प्रश्न: ५ अधोलिखितेभ्य: कयोश्चित् द्वयो: सान्वयं ससन्दर्भं व्याख्यां कुरुत । १०**

(अ) चन्द्रराश्याधिपो यत्र तत्त्रिकोणमथापि वा ।

तत्सप्तमे त्रिकोणे वा संशये लग्ननिर्णय: ॥

(ब) गता: समा: पादयुता: प्रकृतिघ्नसमागणात्

स्ववेदाप्तघटीयुक्ता जन्मवारादिसंयुता: ।

अब्दप्रवेशे वारादिसप्ततष्टेऽत्र निर्दिशेत् ॥

(क) स्वजन्मलग्नात्प्रतिवर्षमेकैकराशिभोगान्मुथहाभ्रमोऽत: ।

स्वजन्मलग्नं रवितष्टयातं गताब्दयुक्तं भमुखेथिहा स्यात् ॥

**प्रश्न: ६ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(अ) वर्षप्रवेशे वारादिसाधनम् ।

(ब) प्राणपदसाधनम् ।

## संयुक्तान्विति:

**प्रश्न: ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) किन्नाम भभोग: ।

(२) किन्नाम भयात: ।

(३) किं नाम पलभा ?

(४) मेषराशे: लङ्कोदयमानं लिखत ।

(५) लग्नभावस्य अपरो नाम लिखत ।

(६) षड्वर्गानां नामानि लिखत ।

(७) नवमांश: क: ?

(८) ऋतूणां नामानि लिखत ।

(९) करणानां नामानि लिखत ।

(१०) इष्टकालस्य परिचयो देय: ।

(११) द्रेष्काण: क: ?

(१२) सूर्यस्य विंशोत्तरीदशामानं लिखत ।

(१३) पञ्चाङ्गस्य अङ्गानां नामानि लिखत ।

(१४) नक्षत्राणां नामानि क्रमेण लिखत ।

(१४) दशरथ: इत्यस्य राशिनाम लिखत ।

----oooo----